Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# भारतीयप्राचीनाधिगमप्रणाल्यां स्मृतिचिन्तनम्



**Dr. Ekkurti Venkateswarlu**
Assistant Professor in Education,
Sri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha
New Delhi, India

**सारांशः** - प्राचीनसंस्कृतशास्त्रेषु विशिष्य दर्शनशास्त्रेषु स्मृतिविषये बहुत्र उल्लेखः कृतः वर्तते। अपि च प्राचीनाधिगमप्रणाल्यां स्मृतेः स्थानं वरीवर्ति यतः स्मृतिना विना पूर्वज्ञानं न भवति। पूर्वस्मृतिना विना नूतनविषयज्ञानम् अर्थात् अधिगन्तुं न प्रभवेयुः इति न्यरूपयन्।

मुख्यशब्दः – मानवः, भारतीयः, प्राचीनः, अधिगम, प्रणाली, स्मृति, चिन्तनम्।

मानवीयं समग्रमपि जीवनम् अधिगमप्रणालीमुपजीवति। मानवः प्रतिक्षणं दर्शनश्रवणाद्युपा- यैर्नानाभिः निरन्तरम् अधिगच्छति। तद्वारा आत्मानं विकासयन् अग्रे सरो भवति। अधिगमश्च अभ्यासेन अनुभवेन वा जीवस्य व्यवहारे वा ज्ञाने वा जायमानं सापेक्षं स्थायिपरिवर्तनमपि मनोवैज्ञानिकरादृतो निरुक्तः।

यथा जीवनमधिगममुपजीवति तथा स्मृतिमपि। अधीतस्य ज्ञानस्य अनुभवस्य वा स्मरणं न भवति तिर्ह तद्व्यर्थमेव। अतः अधिगमे स्मृतिरत्यन्तं प्राधान्यं भजते। मानवीयविकासस्सर्वोऽपि स्मृत्याधारित इति कथनेनास्त्यतिशयोक्तिः। इयं स्मृतिः अधिगतमनुभवं ज्ञानं वा नूतनानुभवैः नूतनज्ञानैस्सह वा संयोज्य मानवीयानुभवराशौ नावीन्यं परिवर्तनञ्च समानीय जीवनं गतिशीलं सम्पादयति। अधुनास्माभिः दृश्यमानो जाग्रतिकविकासः एतत्प्रक्रियोद्वलक एव।

यथा जीवने तथा शिक्षायां स्मृतेः प्राधान्यं निर्विवादमेव। अधीतविषयान् स्मृतिधरान् संस्थाप्यैव बालः अन्यानभिवानंशान् ज्ञातुं प्रयतते। पूर्वपूर्वं ज्ञानमुत्तरोत्तरज्ञानसम्पादने साधकं सम्पद्यते। अत्र पूर्वपूर्वज्ञानस्य उत्तरोत्तरज्ञानसंयोजने स्मृतिरेव साधिका।

अन्यथा बालेन प्रत्येकमपि विषयः प्रतिक्षणं नूतनत्वेनैव अधिगम्येत। स्मृतेर्महत्वम् उररीकुर्वद्भिरप्राचीनार्वाचीनमनोविज्ञानिभिः स्मृतिसाधनोपायाः नैके प्रत्यपादिषत्।

**स्मृतिलक्षणम् स्वरूपञ्च**

न हि सर्वेषां स्मृतिशक्तिः समाना। येषां स्मृतिर्बलवती भवति, ते सकृदेव किञ्चिद् दृश्यमवलोक्य, वार्तां वा श्रुत्वा, पाठं वा पठित्वा स्मरन्ति। एवं विधा जना मेधाविनो गण्यन्ते। मन्दबुद्धयस्तु बहुवारान् दृष्ट्वा श्रुत्वा पठित्वा वापि न स्मर्तंप्रभवयन्ति। स्वल्पकालेन कठस्थीकरणं साधुस्मृतेः प्रथमं लक्षणम्।

**दीर्घकालं यावद् धारणा स्मृतेर्द्वितीयं लक्षणम्।**

**स्मृतस्य वस्तुनः समये प्रत्याह्वानं साधुस्मृतेस्तृतीयं लक्षणम्।।**

**स्मृतेरङ्गानि :-**

स्मृते: त्रीण्ययङ्गानि - १.कण्ठस्थीकरणम्, २.धाराण, ३.प्रत्याह्वानञ्च। यदा कश्चिच्छलोक: स्मर्यते तदा तस्य पौर्वकालिकं कण्ठस्थीकरणम्, एतावन्तं कालं यावद् धारणा च स्पष्टैव। स्मरणस्यापि प्रकारद्वयम् - प्रत्याह्वानम्, प्रत्यभिज्ञा च। एकदा कण्ठस्थी कृतस्य वस्तुनोऽन्यदा स्मरणं प्रत्याह्वानं कथ्यते।इत्येव स्मरणाङ्गानि त्रीणि।

**स्मृतेर्महत्वम्**

अस्माकं जीवने स्मृतिर्महत्त्वं सुविदितम्। न हि कापि शिक्षा, कोऽप्यभ्यासो वा स्मृतिं विना साफल्यं भजते। यदि पूर्ववृत्तं स्मृतं न स्यात्तदा सर्वे कार्यजातमवरुद्धं भवेत्। विचारस्याऽप्याधारः स्मृतिरेव। नहि कश्चित् पुरातनानमनुभवानां स्मरणादृतेविचारं कर्तुं प्रभवति। प्रत्यक्षानुभवेऽपि स्मृतिः सहायिका। न हि पूर्वानुभवानां विस्मृतौ वस्तुदर्शनेन शब्दश्रवणेन वा कोऽप्यर्थावगमः सम्भवति। अत एव सर्वोऽपि जनः कश्चित् पुरातनानमनुभवानां स्मरणादृतेविचारं कर्तुं। प्रभवति। प्रत्यक्षानुभवेऽपि स्मृतिः सहायिका। न हि पूर्वानुभवानां विस्मृतौ वस्तुदर्शनेन शब्दश्रवणेन वा कोऽप्यर्थावगमः सम्भवति। अत एव सर्वोऽपि जनः स्मृतिशक्तिंकामयते। सा च स्मृतिः सर्वेषु जनेषु नैसर्गिकी।

**भारतीयदर्शनानुसारं स्मृतिनिरूपणम्**

आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः[१] इति। ज्ञानमात्रं प्रत्येकवात्ममनः संयोगविशेषस्य कारणात् तस्मात् संस्काररूपासाधारणकारणञ्च स्मृतिः भवति। तथैव - भावनाऽसाधारणकारणज्ञानं स्मृतिः[२]। भावना नाम संस्कार एव। स चानुभवजन्यः स्मृतिहेतुरन्तः करणधर्मस्तार्किकादिमतेषु आत्मविशेषगुणो वा।

गौतमसूत्रे स्मृतीनां बहुविधान् हेतू नुद्बोधकांश्चल्लिख्यश्चो विचित्रानि निदर्शनाणि प्रपि चतानि। तानि च सर्ववादिसम्मतत्वादुलिलख्यन्ते। यथोक्तं प्रणिधान - निबन्धाभ्यास - लिंग -लक्षण - सादृश्य - परिग्रहाश्रयाश्रित -

सम्बन्धानन्तर्यवियोगैककार्यविरोधातिशय - प्राप्ति - व्यवधान - सुख - दुःखेच्छा- द्वेष - भयार्थित्वक्रिया - राग - धर्माधर्मनिमित्तेभ्य इति।[३] अत्र -

१. प्रणिधानं मनसो विषयान्तरसंचारवारणं तदर्थस्मृतिकारणम्।

२. निबन्ध एकग्रन्थोपनिबन्धनम्, यथा प्रमाणेन प्रमेयादि स्मरणं

३. अभ्यासः संस्कारबाहुल्यम्, एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोधकसमवधानं भवति।

४. लिंगम् - व्याप्यं व्यापकस्य स्मारकं भवति।

५. लक्षणं कपिध्वजादि अर्जुनादेः स्मारकम्।

६. परिग्रहः स्वस्वामिभावः,स्वेन वा स्वामी, स्वामिना वा स्वं स्मर्यते।

७. आश्रयाश्रिता राजादितत् परिजनौ परस्परस्मारकौ।

८. सम्बन्धो गुरुशिष्यभावादिः

९. आनन्तर्यं - यथा प्रोक्षणमवधातस्य स्मारकम्।

१०. वियोगो दारादेः स्मारकः।

११. एककार्यात् कर्तन्तरदर्शनात् कर्तन्तरे स्मृतिर्भवति।

१२. विरोधादहिनकुलादेरन्यतरेणापरस्मरणम्।

१३. अतिशयः संस्कार उपनयनादिराचार्यादेः स्मारकः।

१४. प्राप्तिर्धमादेर्दातारं स्मारयति।

१५. व्यवधानमावरणम्, कोषादि खड्गादेः।

१६. सुखदुःखाभ्यां तद्धेतुः स्मर्यते।

१७. इच्छाद्वेषाभ्यां यमिच्छति यं च देष्टि तं स्मरति।

१८. भयं तद्धेतोः स्मारकम्।

१९. अर्थित्वं दातुः।

२०. क्रिया - यथा रथेन रथकारः स्मर्यते।

२१. रागः पुत्रादेः स्मारकः।

२२. धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणम्। हेतुविभागश्चायमतीवस्थूलः।

उक्तं च भाष्यकारेण निदर्शनं स्मृतिहेतूनां न परिसंख्यानम् [४] इति। रागद्वेषभयादीनां स्मारकत्वन्तु प्रसिद्धमेव।

श्रीधरः तदित्येव स्मृतेराकारः। तत्र चार्थस्यातीयत्वं पूर्वानुभूतत्वं प्रतीयत इत्यतीतविषया स्मृतिः। अत एव न प्रमाणम्, तस्याः पूर्वानुभवविषयत्वोपदर्शनेनार्थं निश्चिवत्या अर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यात् [५]।

पतञ्जलस्य मतानुसारम् अनुभूतविषयासम्प्रमोषः स्मृतिः[६] इति स्मृतिलक्षणं कृतम्। प्रमाणादिभिरनुभूते विषये योऽसम्प्रमोषः अस्तेयः सा स्मृतिरित्यर्थः। नव्यन्याये स्मृतिः यथार्थायथार्थभेदेन द्विविधा। प्रमाजन्या यथार्था, अप्रमाजन्याऽयथार्था।

**मीमांसकाः**

**तत्र यत् पूर्वविज्ञानं तस्य प्रामाण्यमिष्यते।**

**तदुपस्थानामात्रेण स्मृतेश्च चरितार्थता।।[७]**

एवं पूर्वज्ञानस्यैवावृत्ति मात्ररूपत्वेन स्मृतेर्न प्रमात्वमिति भाट्टमतम्। तार्किकादीनाम्मते यस्य विषयस्य पूर्वं अनुभवस्वरूपस्य विषयस्यैव स्मृतिः न त्वनुभवस्यापि तस्य पूर्वानुभवाविषयत्वात्। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयकं संस्कारमारभते, स संस्कारः स्वयं जन्यै जनकस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। [८]

अद्वैतवेदान्तिभिर्यद्यपि संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति९। स्मृतिलक्षणं स्वीकृतं तस्या यथार्थत्वमपि स्वीकृतं तथापि स्मृतेरर्थमात्राविषयत्वं तेषामभिप्रेतं न तु पातञ्जलमतवत् प्रत्ययविषयत्वमपि। शाङ्करमते स्मृति अनुभवान्दापेक्षया संस्कारोद्बोधाधीनम् इति अप्रतिपादयत्।

इत्थम् स्मृतिः यथार्थ - अयर्थार्थ - पूर्वजन्मार्जित - प्रत्यक्षादिप्रमाण - प्रणिधानादियुक्तयः - अनुभव - अभ्यासादि भिन्नभिन्नप्रकारैः स्मृतिः उत्पद्यते इति भारतीयप्राचीनार्षयः अप्रतिपादयन्।

भारतीयप्राचीनमनोवैज्ञानिकानां मतम् :-

अस्मत्प्राचीनभारतीयमनोविज्ञानिनां स्मृतिविषयकं मतम् आधुनिकमनोवैज्ञानिकानां स्मृति विषयकात् मतता भिद्यते। अनुभूतविषयासम्प्रोषः स्मृतिः इति स्मृतिं व्याकुर्वता पतञ्जलिपादेन चित्ते अनुभूतानां विषयचयाणां तावन्मात्रतायामुतेततोन्यूनमात्रतायां वा ज्ञानं स्मृतिरिति कीर्तितम्। ज्ञानञ्च द्विप्रकारकं स्मृत्यनुभवभेदेन। अनुभवभिन्नं ज्ञानं स्मृतिः।

मनसि अनुभवस्थापनप्रक्रिया तथा चेतनमनसि अनुभवानयनक्रियापि आधुनिकैः स्मृति-पदेन निगद्यते। अनुभवो भिन्नः स्मृतिश्च भिन्नेति अस्मदीयाः।

दर्शनश्रवणादिना वस्त्वनुभवसमानः संस्कारः चित्ते भवति। यदा तत्संस्कार जागरणानुकूलसामग्री उपस्थीयते तदा अनुभूतविषयसंस्काराः जागरन्ति। तदैव तदनुभवाकारकं चित्तं भवति। सैव स्मरतिरिति। इत्थम् अनुभूतविषयसंस्काराकारि भवति

चित्तं यदा तदा स्मृतिरिति। स्मरणं न केवलं विषयज्ञानस्य न केवलं विषयस्य वा भवति परं द्वयोः। अर्थात् विषयज्ञानविषययोः भवति।

**उपसंहारः**

प्राचीनसंस्कृतशास्त्रेशु विशिष्य दर्शनशास्त्रेषु स्मृतिविषये बहुत्र उल्लेखः कृतः वर्तते। अपि च प्राचीनाधिगमप्रणाल्यां स्मृतेः स्थानं वरीवर्ति यतः स्मृतिना विना पूर्वज्ञानं न भवति। पूर्वस्मृतिना विना नूतनविषयज्ञानम् अर्थात् अधिगन्तुं न प्रभवेयुः इति न्यरूपयन्।

**पादटिप्पण्यः :-**

१. वै.सू.९.२.६, २. पदा.१२१, ३. न्या.सू.३.२.४४

४. न्या.सू.भा.३.२.४४, ५.न्या.क.पृ.६२५,६२६, ६. पा.यो.सू.१.११

७. श्लो.षा.पृ.६२७, ८. यो.सू.भा.१.११, ९. अद्वैत.कौ.पृ.२५८-२५९

**परिशीलितग्रन्थसूची :-**

१. अभिनवमनोविज्ञानम् - प्रभदु यालु अग्निहोत्री, सम्पर्णानन्दग्रन्थमाला, वारणासि, १९९५.

२. न्याय एवं वैशेषिकदर्शन - श्री श्रीरामशर्मा आचार्यः, ब्रह्मवर्चस प्रकाशनम्, हरिद्वार्.

३. पातञ्जलयोगदर्शनम् - व्यासः, ईस्टर्न बुक् लिंक्, दिल्ली.

४. पातञ्जलयोगदर्शनम् - स्वामिशिवोम् तीर्थः, श्री उदय् प्रिन्टर्स, हैदराबाद.

५. प्राचीनभारत की शिक्षा पद्धति - डा.कृष्णकुमार, मयंक प्रकाशन, हरिद्वार, १९९९.

६. प्राचीनभारतीयमनोविद्या - श्रीदीनेशचन्द्रशास्त्रिणः, कोलकता विश्वविद्यालयः, कलकत्ता,१९७२.

७. भारतीयदर्शन - जयदेव वेदालंकारः, न्यू भारतीय बुक् कार्पोरेशन्, दिल्ली.

९. भारतीय संस्कृति - डा.प्रीति प्रभा गोयल, राजस्थानी ग्रन्थागार, जोधपुर्.